श्रीः

श्रीमते नारायणाय नमः

# नारायणोपनिषत् ॥

[ओम् सह नाववत्विति शान्तिः।]

ओम्। अथ पुरुषो ह वै नारायणोऽकामयत, प्रजाः सृजेयेति। नारायणात् प्राणो जायते; मनः सर्वेन्द्रियाणि च; खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी। नारायणात् ब्रह्मा जायते। नारायणात् रुद्रो जायते। नारायणात् इन्द्रो जायते। नारायणात्

---

श्रीः

श्रीमद्भ्यो रङ्गरामानुजमहादेशिकेभ्यो नमः।

## नारायणोपनिषत्परिष्कारः।

श्री श्रीनिवासकरुणैकनिरूढभूम-
वेदान्तलक्ष्मणयतीन्द्रकटाक्षलक्ष्यम्।
श्रीरङ्गलक्ष्मणमुनिं प्रणिपत्य मूर्ध्ना
नारायणोपनिषदञ्च परिष्करोमि॥

वेदेषु सर्वेष्वपि पठ्यमाने पुरुषसूक्तेऽन्यत्र च पुरुष इति यः प्रसिद्धः पुरुषोत्तमः, स एव, नारायण इत्यपि नानाम्नायप्रसिद्धः। भगवन्मन्त्रेषु व्यापकमन्त्रात्रयः प्रधानभूताः। प्रधानतमस्तु श्रीमदष्टाक्षरनामा नारायणमन्त्रः। विष्णुगायत्री च विष्णुनारायणवासुदेवपदेषु नारायणपदमेव प्रथमतो गृह्णाति। वासुदेवपदमपेक्ष्य विष्णुपदं विश्वतः श्रुतिषु प्रयुक्तम्। ततोऽपि नारायणपदमेवाधिकतरमभ्यस्यते। नारायणपदस्य निरङ्कुशो महिमा निखिलापेक्षितार्थनिरूपणक्षमता च रहस्यग्रन्थतो यथावदधिगन्तव्यौ। तदियं नारायणोपनिषत् निखिलवेदवेद्यतया निरवधिकमहिमनारायणमन्त्रोपास्यतया च तमेव पुरुषं नारायणं प्रतिबोधयितुं तस्य ब्रह्मरुद्रादिसर्वजगत्कारणत्वं सर्वेषस्यात्मभावञ्च यथाक्रमं प्रथममाह—अथ पुरुष इत्यादिना।

प्रजापतिः प्रजायते । नारायणाद् द्वादशादित्या रुद्रा वसवः । सर्वाणि च्छन्दांसि नारायणादेव समुत्पद्यन्ते । नारायणात् प्रवर्तन्ते । नारायणे प्रलीयन्ते । एतदृग्वेदशिरोऽधीते ॥ १ ॥

अथ नित्यो नारायणः । ब्रह्मा नारायणः । शिवश्च नारायणः । शक्रश्च नारायणः । कालश्च नारायणः । दिशश्च नारायणः । विदिशश्च नारायणः । ऊर्ध्वं च नारायणः । अधश्च नारायण. । अन्तर्बहिश्च नारायणः । नारायण एवेदं सर्वम्, यद् भूतं यच्च भव्यम् । निष्कलङ्को निरञ्जनो निर्विकल्पो निराख्यातः शुद्धो देव एको नारायणः । न द्वितीयोऽस्ति कश्चित् । य एवं वेद, स विष्णुरेव भवति । एतद्यजुर्वेदशिरोऽधीते ॥ २ ॥

ओमित्यग्रे व्याहरेत् । नम इति पश्चात् । नारायणायेत्युपरिष्टात् । ओमित्येकाक्षरम् ॥ नम इति द्वे अक्षरे । नारायणायेति पञ्चाक्षराणि । एतद्वै नारायणस्याष्टाक्षरं पदम् । यो ह वै नारायणस्याष्टाक्षरं पदम-

---

ब्रह्मरुद्रादीनां प्रजानां प्राण-करण-पञ्चभूतमयकलेवरकलितजनितया प्रथमतः प्राणाद्युत्पत्तिमपि नारायणादाह नारायणादिति । अत्र निमित्तवदुपादानत्वस्यापि विवक्षितुं युक्तत्वात् नारायणपदानि यथार्हं चेतनाचेतनात्मकसूक्ष्मविशेषणशिष्टपराणि भाव्यानि । एवं नारायणस्य सर्वकारणत्वमधिगमितम् । (१)

अथ सर्वोपादानत्वाद्युपयुक्तं शरीरात्मभावनिबन्धनं सार्वात्म्यं तस्याऽऽह अथ नित्य इति । अन्यत्र च श्रुतिषु जन्मस्थितिलयहेतुत्वपुरस्सरं सार्वात्म्यमुद्घुष्यते 'सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः', 'ऐतदात्म्यमिदं सर्वम्' इति ; 'सर्वं खल्विदं ब्रह्म तज्जलानिति' इति च । नित्यो नारायण इत्यस्य ब्रह्मादिवत् स न नश्यतीत्यर्थः। अथवा उपरितनवाक्यैकरस्याय, नित्यसूर्यात्मा नारायण इत्यर्थो ग्राह्यः । विष्णुरेव = विष्णुसमः । (२)

अथ तदुपासनोपयुक्तं मन्त्रमाह ओमिति । अष्टाक्षरं पदमिति ।

ध्येति, अनपब्रुवः सर्वमायुरेति ; विन्दते प्राजापत्यं रायस्पोषं गौपत्यम् । ततोऽमृतत्वमश्नुते ततोऽमृतत्वमश्नुत इति । एतत् सामवेदशिरोऽधीते ॥ ३ ॥

---

पद्यते=प्रतिपाद्यते तत्त्वहितपुरुषार्थमयं प्रमेयमनेनेति पदमिदं वाक्यरूपमेव ग्राह्यम्। तथा च प्रयोगः, 'कार्ययोजनधृत्यादेः पदात् प्रत्ययतः श्रुतेः' इति। इमानि श्रुतिवाक्यानि मनसिकृत्य च श्रीमति रहस्यत्रयसारे पद्यं न्यबन्धि,—

'तारं पूर्वं तदनु हृदयं तच्च नारायणाये-
त्याम्नायोक्तं पदमवयतां सार्थमाचार्यदत्तम् ।' इति ।

अत्र तच्च=नानाश्रुतिप्रसिद्धञ्च नारायणेति तृतीयं पदमवयतामिति व्याख्यान्ति। तथा च पूर्वं तारं प्रणवमवयतां तदनु हृदयं नमः-पदमवयताम्, अथ तत् नारायणेति च पदमवयतामिति व्याख्यातृसंमतोऽन्वयक्रमः। अत्रान्यविधेऽन्वय एव औचित्यं पश्यन्ति, यथा-पूर्वं तारं भवति। तत् अनु=ततः पश्चात् हृदयं भवति। तच्चेत्यत्र अनु इत्येतदनुकृष्यते। तच्चानु=नमःपदानन्तरञ्च नारायणेति पदं भवति। इत्याम्नायोक्तम् 'ओमित्यग्रे व्याहरेत्' इत्यादिप्रकृतश्रुत्या एवं घोषितं पदं 'नारायणस्याष्टाक्षरं पदम्' इति पदशब्दोपात्तं मन्त्रमवयतामिति। ननु तारमिति नपुंसकं प्रणवरूपार्थे अप्रसिद्धमिति चेन्न-तथा सति श्रुताविव श्लोकेऽपि, तारं व्याहरेदिति पदाध्याहारसंभवात्। तदनु इति च समस्तं पदमस्तु। तदेकदेशस्य अनु इत्यस्योपरि विभज्यानुषङ्गोऽस्तु। वस्तुतस्तु तारपदं नपुंसकं प्रसिद्धमेव। यथा अथर्वशिरसि, 'स ओङ्कारः यः प्रणवः—सोऽनन्तः तत् तारम्' इति, 'अथ कस्मादुच्यते तारम्? यस्मादुच्चार्यमाण एव गर्भजन्मव्याधिजरामरणसंसारमहाभयात् तारयति, त्रायते च, तस्मादुच्यते तारम्' इति च स्पष्टं नपुंसकमेव निर्दिष्टम्। (३)

प्रत्यगानन्दं ब्रह्म पुरुषं प्रणवस्वरूपम् । अकार उकारो मकार इति । तानेकधा समभरत् तदेतदोमिति । यमुक्त्वा मुच्यते योगी जन्मसंसारबन्धनात् । ओम् नमो नारायणायेति मन्त्रोपासको वैकुण्ठभुवनं गमिष्यति। तदिदं पुण्डरीकं विज्ञानघनम्। तस्मात् तडिदाभमात्रम् ।

ब्रह्मण्यो देवकीपुत्रो ब्रह्मण्यो मधुसूदनः ।
ब्रह्मण्यः पुण्डरीकाक्षो ब्रह्मण्यो विष्णुरुच्यते ॥ इति ।

सर्वभूतस्थमेकं नारायणं कारणपुरुषमकारणं परं ब्रह्मोम् । एतदथर्वशिरोऽधीते ॥ ४ ॥

प्रातरधीयानो रात्रिकृतं पापं नाशयति। सायमधीयानो दिवसकृतं पापं नाशयति । तत् सायं प्रातरधीयानो पापोऽपापो भवति।

---

प्रणवे अक्षरविभागं दर्शयति प्रत्यगिति। अकारोकारमकारात्मकं प्रणवस्वरूपं प्रत्यगानन्दं ब्रह्म प्रतिपादयतीत्यर्थः। अकारवाच्यब्रह्मैकशेषभूतः प्रत्यगात्मेति प्रणवार्थः। तच्छेषत्वं च तदतिशयावहत्वं तदानन्दहेतुव्यापारकारिणि प्रत्यगात्मन्यस्तीति भवति ब्रह्म प्रत्यगधीनानन्दशालि। अतः तत् प्रत्यगानन्दम्। अथवा प्रत्यक्=स्वस्मै स्वयं प्रकाशमानम्। उकारोऽवधारणप्रणवेऽर्थः; लक्ष्मीवाचको वा। पुण्डरीकं शुभ्रम्। उत्कृष्टं वा। यथा बृहदारण्यके आदित्यमुपतिष्ठमान आह-(८.३.)-'दिशामेकपुण्डरीकमसि। अहं मनुष्याणामेकपुण्डरीकं भूयासम्' इति। तडिदाभमात्रं कार्त्स्न्येन ज्योतिर्मयम्। तमसः परस्तात् स्थिते वैकुण्ठभुवने तमसः क्वचिदपि न प्रसक्तिः। तदीयज्योतिर्मयत्वपरिशीलने प्रकृतिरियं तमोवत् अन्धकारवत् अध्यवसेया भवतीति तम इत्युच्यते। नारायणमिति, गमिष्यतीत्यत्रान्वेति। (४)

वेदचतुष्टयशिरसां निर्दिष्टानामध्ययनस्य फलं दर्शयति प्रातरिति। 'तदन्तर्भावात् तेषां न पृथगभिधत्ते श्रुतिरपि' इति न्यायेन नारायणाभिधायि पदं सर्वं तद्वक्षःस्थलनित्यवासया श्रिया सहित-

माध्यंदिनमादित्याभिमुखोऽधीयानः पञ्चमहापातकोपपातकात् प्रमुच्यते । सर्ववेदपारायणपुण्यं लभते । नारायणसायुज्यमवाप्नोति, श्रीमन्नारायणसायुज्यमवाप्नोति, य एवं वेद ।

[ओम् सह नाववत्विति शान्तिः ॥]

इति नारायणोपनिषत् ॥

श्रीरस्तु

—:✱✱:—

मेव नारायणमाहेति अष्टाक्षरमन्त्रे उकारस्यान्यार्थकत्वेऽपि लक्ष्मीरुक्तप्राया ; किमुत उकारस्य लक्ष्मीपरत्वे 'उद्धृता विष्णुना लक्ष्मीरुकारेणोच्यते तथा' इति स्मरणादित्याशयेन श्रीमन्नारायणेत्युक्तम् ।

इति वात्स्यमचक्रवर्ति-वीरराघवाचार्यकृतिषु

उपनिषद्भाष्यपरिष्कारे । नारायणोपनिषत्परिष्कारः ।

शुभमस्तु

—o—o—

## महोपनिषन्नारायणोपनिषदर्थसंग्रहः

नारायणस्य पारम्यं ब्रह्मेशाद्युद्भवस्ततः ।
अन्तर्यामित्वमैक्यञ्च महोपनिषदीरितम् ॥ (१)
देहिनां हृदयस्यान्तर्मेघश्यामतनोर्हरेः ।
योगिध्येयतया स्थित्याऽप्यन्तर्यामित्वमीरितम् ॥ (२)
ऋग्यजुः साम चाथर्व वेद इत्येतदंशभाक् ।
नारायणोपनिषद्ध्याह नारायणं परम् ॥ (३)
ब्रह्मरुद्रेन्द्रमुख्यानां ततो जन्म तदात्मताम् ।
श्रीमदष्टाक्षरमनुं प्रणवस्याक्षरादि च ॥ (४)
तत्तदंशक्रमेणोक्त्वा मुक्तिहेतोरितो मनोः ।
सर्वश्रुतिजपाधाय्यं फलञ्च बहु माऽब्रवीत् ॥ (५)